संस्कृतवार्ता:
09.07.2024
सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् अस्माकं तृतीये कार्यकाले भारतं विश्वस्य तृतीया बृहत्तमार्थव्यवस्था स्यादिति सर्वकारस्य लक्ष्यम् अस्ति ।

· प्रधानमन्त्री नरेन्द्रमोदी रूसस्य राष्ट्रपतिः व्लादिमीरः पुतिनः च मॉस्कोनगरे द्वयोः देशयोर्मध्ये जायमानस्य द्वाविंशतितमस्य वार्षिक-शिखर-सम्मेलनस्य सह-अध्यक्षतां करिष्यत: ।

· बिहारे विगतासु चतुर्विंशति-होरासु कतिपयेषु भागेषु अत्यधिकवृष्टिः अभवत् । भारतऋतुविज्ञानविभागः (IMD) इत्यनेन आगामिषु चतुर्दिवसेषु मध्य, पूर्वोत्तर, पूर्वीभारतस्य केषुचित् भागेषु अत्यधिकवृष्ट्याः पूर्वानुमानं प्रकटितम् अस्ति।

· भारतीय-ओलंपिक-संघः इत्यनेन द्वाविंशत्यधिकद्विसहस्रतमाब्दायाः ओलंपिक-क्रीडायाः कांस्य-पदक-प्राप्तः लक्ष्यभेदकः गगन-नारंगः पेरिसनगरे भविष्यमाणासु ओलंपिकक्रीडासु प्रतिस्पर्धायै भारतीय-दलस्य शेफ-डी-मिशन इत्येन रूपेण नामाङ्कितः ।

· अद्य चेन्नैनगरस्य एम्.ए. चिदम्बरमक्रीडाङ्गणे विंशतिप्रतिविंशति क्रिकेट-प्रतिस्पर्धाया: तृतीये अन्तिमे च द्वन्द्वे भारतीय-महिला-क्रिकेट-दलं दक्षिणाफ्रीकादलेन सह स्पर्धां करिष्यति।

प्रधानमन्त्री-भारतीय-समुदाय:

प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् अस्माकं तृतीये कार्यकाले भारतं विश्वस्य तृतीया बृहत्तमार्थव्यवस्था स्यादिति सर्वकारस्य लक्ष्यम् अस्ति । रूसस्य मॉस्को-राजधान्यां भारतीय-समुदायं सम्बोधयन् श्री-मोदी अकथयत् यत् ,अद्यतनं भारतं यत् किमपि लक्ष्यं चिनोति, तत् प्राप्नोति । सः प्रोक्तवान् यत्, नूतन-सर्वकारस्य स्थापनायाः अनन्तरं प्रवासि-भारतीयैः सह तस्य अयं प्रथमः एव सम्वादः अस्ति । श्रीमोदिना इदमपि प्रोक्तं यत् तेन त्रिगुणित-बल-गतिभ्यां कार्यनिष्पादनस्य सङ्कल्पः कृतः अस्ति । प्रधान-मन्त्री नरेन्द्रमोदी रूसस्य राष्ट्रपतिः व्लादिमीरः पुतिनः च मॉस्कोनगरे द्वयोः देशयोर्मध्ये जायमानस्य द्वाविंशतितमस्य वार्षिक-शिखर-सम्मेलनस्य सह-अध्यक्षतां करिष्यत:। द्वावेव नेतारौ रक्षा,व्यापार, निवेशोर्जा चेत्यादिविषयान् समेत्य द्विपक्षीयविषयेषु समीक्षावार्तां विधास्यतः । तौ परस्परहितस्य क्षेत्रीये वैश्विके

विकासे चापि स्वकीयं दृष्टिकोणं स्थापयिष्यतः । ध्यानास्पदं वर्तते यत् श्रीमोदी रूसस्य द्वि-दिवसीयायां आधिकारिकयात्रायां ह्यः सायं मास्कोनगरं प्राप्तवान् ।

<u>बिहार-वृष्टिः</u>

बिहारे विगतासु चतुर्विंशति-होरासु कतिपयेषु भागेषु अत्यधिकवृष्टिः अभवत्। ऋतुविभागेन पटना, सिवान, गोपालगंज, सारण, सहरसा, मधेपुरा, कटिहार, भागलपुर, नवादा मण्डलेषु सहैव राज्यस्य पश्चिम-दक्षिण-मध्यभागेषु अपि आगामि चतुर्विंशतिः होरासु अतिवृष्ट्याः कृते पीतवार्णिकी-सन्चेतना प्रसारितास्ति। भारतऋतुविज्ञानविभागः (IMD) इत्यनेन आगामिषु चतुर्दिवसेषु मध्य, पूर्वोत्तर, पूर्वीभारतस्य केषुचित् भागेषु अत्यधिकवृष्ट्याः पूर्वानुमानं प्रकटितम् अस्ति। आईएमडी इत्यनेन उक्तं यत् उपहिमालयीये क्षेत्रे, पश्चिमबङ्गे, सिक्किमे, बिहारे, अरुणाचलप्रदेशे, असम-राज्ये, मेघालये च एतादृशी परिस्थितिः अस्य मासस्य द्वादश-दिनाङ्कपर्यन्तं भविष्यति ।

<u>शेफ डे मिशन- पेरिस ओलंपिक:</u>

भारतीय-ओलंपिक-संघः इत्यनेन द्वाविंशत्यधिकद्विसहस्रतमाब्दायाः ओलंपिक-क्रीडायाः कांस्य-पदक-प्राप्तः लक्ष्यभेदकः गगन-नारंगः पेरिसनगरे भविष्यमाणासु ओलंपिकक्रीडासु प्रतिस्पर्धायै भारतीय-दलस्य शेफ-डी-मिशन इत्येन रूपेण नामाङ्कितः । पीवीसिंधु , अचंता-शरथ-कमल च उद्घाटन-समारोहे ध्वजवाहकत्वेन सम्मिलितौ भविष्यतः ।

<u>प्रधानमंत्री - समाधिस्थलम्</u>

प्रधानमन्त्री नरेंद्रमोदी अद्य रूसस्य मॉस्कोनगरे अज्ञात-सैनिकस्य समाधिस्थले श्रद्धांजलिना सह पुष्पाञ्जलिम् अपि समर्पयत् । अवधेयं यत् अज्ञातसैनिकस्य समाधिस्थलं मॉस्कोनगरस्य क्रेमलिन-भित्तौ स्थितः एकः युद्धस्मारकः अस्ति । एतत् स्थलं तेभ्यः सोवियत-सैनिकेभ्यः समर्पितम् अस्ति, ये द्वितीये विश्वयुद्धसमये स्वकीय-प्राणाहुतिं प्रायच्छन् ।

## दिल्ल्यारक्षिबलम्

दिल्ल्यारक्षिबलेन अन्ताराष्ट्रियांग-प्रत्यारोपण-गुल्मस्य प्रकरणे एकेन चिकित्सकेन सह सप्तजनाः निगडिताः। अपराध-शाखायाः आरक्ष्युपायुक्तः अमितगोयलः प्रोक्तवान् यत् ,अस्य गुल्मस्य प्रमुखः बांग्लादेशस्य एकः नागरिकः आसीत् । सः अकथयत् यत् , अपराधशाखया अन्यः एकः जनः अपि नगडितः , यः रुग्णानां अङ्ग-दातॄणां च व्यवस्थापकः आसीत् । प्रत्यारोपणे सम्मिलिता एका महिला चिकित्सिका अपि निगडिता वर्तते । श्रीगोयलः प्रोक्तवान् यत् , आरोपिणः नवदशोत्तर-द्विसहस्रतमाब्दात् अङ्गप्रत्यारोपणस्य गुल्मं सञ्चालयन्ति ।

## द्रौपदीमुर्मु-ओडीशा

राष्ट्रपति द्रौपदीमुर्मुवर्या राष्ट्रियविज्ञान-शिक्षा-अनुसन्धान-संस्थानम् (एनआईएसईआर) इत्यस्य छात्रान् मानवतायै राष्ट्राय च स्वकीययोः शिक्षा-ज्ञानयोः प्रयोगं कर्तुं सम्प्रार्थितवती । भुवनेश्वरे राष्ट्रियविज्ञान-शिक्षा-अनुसन्धान-संस्थानस्य त्रयोदशतमं स्नातक-समारोहं संबोधयन्ती सा संस्थानस्य स्नातकेभ्यः वर्धापनं प्रायच्छत् । अस्मिन्नवसरे मुर्मुवर्या छात्रान् प्रेरयन्ती प्रावोचत् यत् ते स्व-स्वक्षेत्रेषु सर्वश्रेष्ठ-कार्यं कुर्वन्तः देशाय प्रशंसां समर्जयेयुः। राष्ट्रपतिवर्या शिक्षां अमृततुल्यं प्रतिपायन्ती अकथयत् यत् भारतीय-भौतिकविदः सी. वी. रमनः, प्रख्यातः खगोल-विज्ञः , गणितज्ञः पठानी-समंता चेत्यादीनां अविस्मरणीय-व्यक्तित्वानां निर्माणे शिक्षायाः एव योगदानम् वर्तते। यद्यपि राष्ट्रपतिवर्यया विद्यार्थिनः सञ्चेतिताः सन्ति यत् ते अध्ययनानुसंधानसमये विज्ञानप्रोद्योगिक्योः दुरूपयोगं न कुर्युः यतः एतादृशं कार्याचरणं मानवस्य विनाशस्य कारणभूतं भवितुम् अर्हति । ध्यानास्पदं वर्तते यत् राष्ट्रपतिवर्या पुर्य्यां रथयात्रायां अन्येषु कार्यक्रमेषु च भागं भजितुं शनिवासरात् स्वीकीयस्य गृह-राज्यस्य ओडिशायाः चतुर्दिवसीयायां यात्रायां वर्तते ।

## हाथरस - निगडनम्

उत्तरप्रदेशसर्वकारेण हाथरस-प्रकरणे विशिष्टान्वीक्षणदलम् (एसआईटी) इत्यनेन प्रस्तुतस्य प्रतिवेदनस्य अनन्तरं षट्-अधिकारिणः निलम्बिताः। अद्य प्रस्तुते एसआईटी-प्रतिवेदने उक्तं यत् आयोजनस्य आयोजकानां प्रमादः एव अस्य घटनायाः मुख्यकारणम् आसीत्। एसआईटी इत्यस्य प्रतिवेदनानुसारं हाथरसमण्डलस्य मण्डलाधिकारिणं समेत्य षड्-जनाः निलम्बिताः। आकाशवाणी संवाददात्रानुसारि विशिष्टान्वीक्षणदलम् इत्यनेन प्रोक्तं यत् स्थानीय-प्रशासनस्यापि अस्मिन् प्रकरणे उत्तरदायित्वं अस्ति। सदस्यद्वयोः विशिष्टान्वीक्षणदलेन उक्तं यत्

षड्यंत्रस्य आशङ्का तु अस्ति एव तथापि गहनतया अन्वेषणस्य आवश्यकतापि वर्तते। प्रतिवेदने उक्तं यत्, आयोजनस्य आयोजकाः जनसम्मर्दानुसारं पर्याप्त-सज्जतां न कृतवन्तः।

क्रिकेट

अद्य चेन्नैनगरस्य एम्.ए. चिदम्बरमक्रीडाङ्गणे विंशतिप्रतिविंशति क्रिकेट-प्रतिस्पर्धाया: तृतीये अन्तिमे च द्वन्द्वे भारतीय-महिला-क्रिकेट-दलं दक्षिणाफ्रीकादलेन सह स्पर्धां करिष्यति। प्रतिस्पर्धाया: अस्या: प्रसारणं सायं सप्तवादने भविष्यति। दक्षिणाफ्रीकदलं श्रृङ्खलायाम् एकं शून्यम् इत्यङ्कान्तरालेन अग्रे प्रचलति।

।। इति वार्ता: ।।